# मनुस्मृत्युक्तदिशा स्त्रीसंग्रहणम्

ड. विश्वजित्पालः

नवपल्ली जे.सि.एस. उच्चविद्यालयः, मुर्शिदावादः, प.वङ्गः

धर्मार्थकाममोक्षाख्येषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्तकत्वेण तथा नियन्त्रकत्वेण धर्मस्येव प्राधान्यं स्वीकियते। अतिलोड्गिनि संसारे धर्मस्येव नितरां सर्वेऽनुमन्यते। आततत्प्रतिपादकशास्त्रत्वेन धर्मशास्त्रस्य गुरुत्वमत्यन्तमावहति। धर्मशास्त्रं मानवाचरस्यापि नियामकम्। मनुष्यः स्वाभिलषितपदार्थान् यस्मात् प्राप्तुं शक्नोति तत्त्वप्रतिपादनेनैव धर्मशास्त्रस्यादेयम्। धर्मः श्रौतस्मार्तभेदेन द्विधा विभक्तः। स्मार्तधर्म एव धर्मशास्त्रस्य विशेषविषयः। धर्मशास्त्रस्यायतं नाम स्मृतिशास्त्रमिति। सूत्रसाहित्यपरवर्तीकाले श्रुतिवाक्याश्रितवैदिकाचार-व्यवहारानुसारेण विरचितत्वाद् धर्मशास्त्रं स्मृतिशास्त्रमिति नामाभिधीयते।

स्मृतिशास्त्रप्रणेतृणां मध्ये आचार्यमनुः स्मृतिशास्त्रेषु च मनुस्मृतेः प्राचीनत्वं विशालत्वं प्राधान्यमौदार्यञ्च सर्वैर्निर्विवादमनूद्घोषितम्। सर्वजनप्रियस्मृतिरेषा।

धर्मशास्त्रस्य विषयाः आचारव्यवहारप्रायश्चित्तभेदेन त्रिधा विभज्यन्ते। तत्र आचारभागे ब्राह्मणादिचतुर्वर्णानां गृहस्थादिचतुराश्रमाणाञ्च पालनीयकर्तव्यकर्मणामालोचना अस्ति। व्यवहारभागे दण्डनीतेः प्रयोगपद्धतिमूलकस्य दुराचाराणां संशोधनमप्युल्लिखितं भवति।

प्रायश्चित्तभागे ब्रह्मवधादिविविधिपापकर्मणां प्रायश्चित्तविधानमस्ति। स्मृतिशास्त्रत्वात् मनुस्मृतिविषयोऽप्याचारव्यवहारप्रायश्चित्तभेदेन त्रिधा विभक्तः।

मनुस्मृतेरष्टमाध्याये विवादस्थानानां मध्ये दशतमे मनुस्मृतिकारेण स्वीस्त्रीसंग्रहणं। तत्र पञ्चदशसङ्ख्यकविवादस्थानरूपेण "स्त्रीसंग्रहणम्" इति विवादपदं भगवता मनुना समार्थितम्।

विवाहसंस्कारवाहीतां परदारस्रमणे प्रवृत्तिजनो विवादः स्त्रीसंग्रहविवाद इत्यभिधीयते। परदाराभिमर्षणे प्रवृत्तस्य जनस्य नासोच्छेदनादिभिः सज्जनकर्दणे चिन्हितं कृत्वा राजा तं राष्ट्राद्विवासयेत्। तथा चोक्तं मनुस्मृतिकारेण—

परदाराभिमर्षेषु प्रवृत्तान् महीपतिः।
उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्।। (मनुस्मृते 8.352) इति।

परदारगमने समाजे वर्णसंकर उत्पद्यते। तस्माच्च जगन्मूलविनाशकाः अधर्माः मूलेटनाशं साधयन्ति। यथा चोक्तं मन्वर्थमुक्तावल्यां—यस्मात्परदाराभिमर्षात्संभूतो वर्णस्य संकरः। संक्षयते। येन

वर्णसंकरणं विशुद्धफलनिकयजननाभावात् "आन्नो प्रजास्तिहन्तिः सम्यगादित्यपुत्रतिष्ठति" (अ. ३ श्लो. ७६) इत्याभावे सति वृक्षच्छेदनजन्मूलविनाशकाधर्मा जगन्नाशाय संपद्यते (मन्वर्थमुक्तावली 8.353)

इति।

परस्त्रीसम्भाषणाप्युत्कृष्टजनो यथोचितकारणव्यतिरेकेण परभार्यया सह सम्भाषते चेत् राजा प्रथमसाहसेन साधाधिकदण्डेन वा तं दण्डयेत्।

नदीतडागोद्यानादेलनयनकाले मार्गारण्यादिनिर्जनप्रदेशे परस्त्रीणां सम्भाषते चेत् सहस्रपणं दण्डं प्राप्नुयात्। सकुण्डलाद्युपचारणं निःसम्बन्धिकस्त्रियाः स्त्रिय उपकारसाधने तथा सह केलिलस्य वस्त्रालङ्कारादिस्पर्शनमेकटवाससमिच्छापूर्वकमनस्थानस्पर्शनं स्पर्शनोपेक्षणञ्च सर्वं संग्रहाभिमति विवक्षिते। चतुर्वर्णेकिः सर्वदा स्वयोषिरक्षणमवश्यकर्तव्यम्। ब्राह्मणेतरवर्णोऽकामां ब्राह्मणीं प्रति संग्रहापराधं करोति चेत् राजा तस्य प्राणदण्डं विदध्यात्। स्वामिनिर्दिष्टस्त्रीभिः सह सम्भाषणं न कर्तव्यम्। प्रतिषिद्धसंभाषणकारिणं राजा षोडशमाषात्मकसुवर्णेन दण्डयेत्।

समानजातीयामकामां कन्यां गच्छति चेत् तत्क्षणादेव तस्य लिङ्गच्छेदनादिवधदण्डो भवति। इच्छन्तीं कन्यां गच्छति चेत् तत्र वधदण्डो न भवति। काचित् कन्या जातिधर्मसदाचारविद्यया स्वस्मादुत्कृष्टपुरुषं भजति चेत् कन्याया स्वातन्त्र्यहीनत्वात् तस्या अभिभावकस्य नार्थदण्डो भवेत्। हीनपुरुषं तु भजति चेत् तस्माद्विवृत्य पितृगेहे सा स्थापनीया यावत् सा निवर्तितकाम स्यात्। हीनजातिः पुरुष उत्कृष्टजातीयां कन्यामिच्छन्तीमनिच्छन्तीं वा गच्छति स अङ्गुलिच्छेदनमार्गणात्मकं बन्धं प्राप्नोति। कश्चित् समानजातीयामिच्छन्तीं कन्यां गच्छति चेत् स कन्यायाः पित्रे शुल्कगुणपञ्चाशद् दद्यात् न च वधं लभेत। मन्वर्थमुक्तावलीकारोऽपि—

सा च कन्या तेनैव वोढव्या।
(मन्वर्थमुक्तावली 8.366) इति।

यो बलात् समानजातीयायाः स्त्रियो जननाद् अहङ्कारवाङ्गुलिप्रवेशनेन तथाः कन्यां नाशयति राजा तस्याङ्कुशदण्डं शीघ्रं छेदयेत् पाणपदशतानि च दण्डं दापयेत्। यः समानजातिस्त्रच्छलीं कन्यामङ्गुलिप्रक्षेपमात्रेण नाशयति स नखाङ्गुलिच्छेदं प्राप्नोति। तत्कर्मणः प्रसक्तिनिवारणाय

राजा तं द्विशतपणे दण्डयेत्। काचित् कन्या अङ्गुलि-प्रक्षेपणापरकन्याः कन्यत्वं नाशयति चेत् राजा तां द्विशतपणे दण्डयेत्। सा च द्विगुणशुल्कं कन्यायाः पित्रे दद्यात् शिफाग्रहारांश्च दश प्राप्नुयात्।

अधिकवरः सम्प्राप्ता स्त्रीरूपवतीः सम्प्राप्तायाः कन्यायाः कन्यत्वं नाशयति चेत् तस्या दण्डस्वरूपं ब्राह्मणजातीयः सा शिरोमुण्डनमाप्नोति क्षत्रियजातीयः अङ्गुल्येव छेदं वैश्यजातीयः च सा गर्दभेण च राजमार्गं वहन्महतीति। पितृकुलस्य ज्ञातिवर्गस्य च धनेश्वर्यदर्पण स्वीयगुणैर्दोषगुणैर्वा स्वपत्नी परित्यज्य पुरुषान्तरं गच्छति चेत् राजा तां बहुनाकारणं प्रवेशे स्वाभिमक्षयेत्। तथा चोक्तं मनुस्मृतिकारेण —

भर्तारं लंघयेद्या तु स्त्री ज्ञातिगुणदर्पिता।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते।। (मनुस्मृति 8.371)

इति।

तं च पापकर्मिणं पुरुषं लौहशय्यायां स्थापयित्वा दहेत् काष्ठैश्च निष्क्षेपेण यावत् स दग्धः स्यात्। संवत्सरातिक्रमे पुनः परस्त्रीगमनदोषयुक्तो भवति चेत् स पूर्ववद् द्विगुणदण्डसहितः।

शूद्रो भर्तृभिरक्षितामरक्षितां वा द्विजातिस्त्रियं गच्छति चेद् दण्डस्वरूपं स सर्वहरणं लिङ्गच्छेदनञ्च प्राप्नोति। रक्षितनारीसम्भोगे तु शूद्रस्य सर्वहरणेन सह मरणदण्डो विधेयः।

केनचिद् वैश्येन रहसि रक्षितब्राह्मणीसम्भोगे वर्षकालं कारावासः सर्वहरणञ्च कार्यम्। केनचित् क्षत्रियेण च रहसि रक्षितब्राह्मणिगमने राजा तं सहस्रपणं दण्डयात् गर्दभमूत्रेण चार्द्रमस्तकमुण्डनमपि विधेयम्। अरक्षितब्राह्मणिगमने वैश्यः पणपञ्चशतानि क्षत्रियश्च पणसहस्रं दण्डं प्राप्नोति।

कश्चिद् वैश्यः क्षत्रियो वा बलात् गुणवतीं रक्षितब्राह्मणीं गच्छति चेत् तावुभावी वधदण्डं प्राप्नुतः। कुशकाषाशिकटेनावेष्ट्य वा तौ दहेयौ।

केनचिद् ब्राह्मणेन बलात् रक्षितब्राह्मणिगमने स ब्राह्मणः पणसहस्रं दण्डं प्राप्नोति। ब्राह्मण्या इच्छया सत्कर्मभूषणे स ब्राह्मणः पणपञ्चशतं दण्डं लभते। प्राणदण्डोपायप्राप्तोऽपि राजा ब्राह्मणं कदापिचिन्न हन्यात्। तेन सर्वपापमहत्यप्यपराधिनं तं ब्राह्मणं राष्ट्रान्निर्वासयेदिति विधानं शास्त्रसम्मतम्। शास्त्रेषु क्षत्रियवैश्यशूद्राणां तु वधदण्डो विधेयः। पृथिव्यां यतो

ब्राह्मणवधमहतोऽधर्मो नास्ति ततो राजा सर्वपापचारिणो ब्राह्मणस्य वधं मनसापि न

चिन्तयेत्। तथा हि —

न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि।
तस्मादस्य वधं राजा मनसापि न चिन्तयेत्।। (मनुस्मृति 8.381)

इति।

वैश्यो रक्षितक्षत्रियां गच्छति चेत् स दण्डस्वरूपेण पणपञ्चशतानि प्राप्नुयात्। क्षत्रियश्च रक्षितवैश्यां गच्छति चेत्स क्षत्रियः पणसहस्रं दण्डमर्हति। ब्राह्मणः क्षत्रियां वैश्यां वा रक्षितां नारीं गच्छति चेत् तत्र तस्य सहस्रपणमर्धदण्डं भवेत्। क्षत्रियेण वैश्येन वा रक्षितशूद्रागमने सहस्रमेव दण्डः स्यात्। वैश्येनारक्षितक्षत्रियागमने पणपञ्चशतार्धदण्डो भवेत्। केनचित् क्षत्रियेणारक्षितक्षत्रियागमने च गर्दभमूत्रेण मुण्डने पणपञ्चशतानि वा दण्डो भवेदिति। ब्राह्मणेनारक्षितक्षत्रियागमने वैश्यागमने शूद्रागमने वा पणपञ्चशतार्धदण्डो भवेत्।

चण्डालश्वपचाद्यन्तजनाग्रामे च पणसहस्त्रं दण्डो कार्यः। यस्मिन् राज्ये चौरः परस्त्रीगामी वाक्पारुष्यकारी दण्डपारुष्यकारी साहसकारी च न विद्यते स राजा इन्द्रलोकं याति। तथा चोक्तं मनुस्मृतिकारेण —

यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दुष्टवाक्।
न साहसिकदण्डघ्नो स राजा शक्रलोकभाक् ॥ (मनुस्मृति 8.386) इति।

अस्मिन् विषये मन्वर्थमुक्तावल्यां कुल्लूकभट्टाचार्येणोक्तम् — यस्य राज्ञो राष्ट्रे चौरः, परस्त्रीगामी, पुरुषवादी, गृहादिदाहिसाहसकारी, दण्डपारुष्यकर्ता च नास्ति स राजा शक्रपुरं याति (मन्वर्थमुक्तावली 8.386) इति। एवं स्तेनादिपञ्चविधानामपराधीनां निग्रहकारी राजा समानजातीयेषु राजसु मध्ये श्रेष्ठाधिपत्यं तनोति जनसमाजे यशश्च लभते इति।

वर्तमाने समाजपरिवर्तनेन सह सुमुखरूपेण समाजपरिचालनार्थं सर्वजनग्राह्यं शासनं प्रवर्तनीय च मन्वादिस्मृतिशास्त्रोक्तव्यवहारविधानेषु किंचित् परिमार्जनं क्रियते।

वर्तमाने यदि कश्चित् कन्या विवाहार्थमनिच्छां तां समागमार्थमभिलषति वशं च तस्याज्ञायति तर्हि भारतीयदण्डविधौ विशेषत: पञ्चशताधिकत्रिशततमध्यायाः क ख इति विभागानुसारेण (Indian Penal Code 1860, Chapter xvi, Section 354A, 354B) अनैतिकं वर्गीयमनाधिकं

सप्तवर्षव्यर्धदण्डेन सह कारावासं प्राप्नोति। नार्याः अनिच्छायां बलपूर्वकसम्भोगो भारतीयदण्डविधेः षट्त्रिशताधिकत्रिशततमधारानुसारेण (Indian Penal Code 1860, Chapter xvi, Section 376) अनधिकं सप्तवर्षं यावज्जीवं वर्धदण्डेन सह कारावासो भवति। याज्ञवल्क्यस्मृत्यनुसारेण बहवः पुरुषाः काचिदेकामनिच्छन्तीमपि नारीं बलपूर्वकमभिगच्छन्ति चेत् पृथग्भावेन चतुर्विंशतिपणान् दण्डनीयाः।

कन्याश्चेत् नार्याः अनिच्छायां बलात् बहुजनेष्वलितभावेन सम्भोगो भारतीयदण्डविधेः षट्त्रिशताधिकत्रिशततमधाराया धविभागानुसारेण (Indian Penal Code 1860, Chapter xvi, Section 376D) तस्यार्थदण्डेन विंशतिवर्षाधिकः कारावासो भवति।

वर्तमाने स्वामिनोऽनिच्छायामपि कश्चित्स्तस्य भार्यायाः इच्छानुसारं तां प्रति सम्भोगार्थमभिगच्छति सम्भोगं वा करोति चेत् स सम्भोगकर्ता भारतीयदण्डविधेः सप्तनवत्यधिकचतुः-शततमधारानुसारेण (Indian Penal Code 1860, Chapter XX, Section 497) अनधिकं पञ्चवर्षं यावद्दण्डेन सह कारावासमर्हति। सा नारी तु दण्ड्या न भवतीति।

**सन्दर्भितसहायकग्रन्थाः:**

**(Bibliography)**

**सन्दर्भितसंस्कृतभाषोपनिबद्ध ग्रन्थाः:**


- उपाध्यायः, वाचस्पतिः, धर्मशास्त्रस्य संग्रहः, नवरङ्ग, दिल्ली, 1982.
- गुप्ता, ड. पुष्पा, वैदिकसंस्कालनम्, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी, 2008.
- झा. पं. विश्वनाथ, अमरकोषः, मोतीलालबनारसीदासः, वाराणसी, 2007.
- दाहालः, आचार्यलोकमणिः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदासअकॅदमी, वाराणसी, 2005.
- नीलकण्ठः, व्यवहारमयूखः, राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली, 2009.
- मिश्रः, कुलमणिः, धर्मशास्त्रशब्दकोषः, ओडिशाराज्यपर्यटनकीडासंस्कृतिनिदेशनालयः 1981.
- मिश्रः, प्रो. जयकृष्ण :, धर्मशास्त्रस्येतिहासः, चौखम्बासंस्कृतसिरिजअफिस्, वाराणसी, 2010.
- विद्यारत्नः, काशाचन्द्रः, मनुसंहिता, राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली, 2012.
- शर्मा, हरगोविन्दः, मनुसंहिता, चौखम्बाविद्याभवनम्, वाराणसी, 2006.
- शास्त्री, आचार्यजगदीशलालः, मनुस्मृतिः, मोतीलालबनारसीदासः, दिल्ली, 2010.

• सिंहः, नागशरणः, स्मृतिसन्दर्भः, नागप्रकाशकः, दिल्ली, 1993.

• सोयदान, वि.के., स्मृतिमीमांसा, अक्षयप्रकाशनम्, दिल्ली, 2006.


**सन्दर्भितवाङ्मयभाषापरिनिबद्ध ग्रन्थाः :**


• अनिर्वाण, वैदिकसाहित्यम् (वेदमीमांसा), संस्कृत बुक डिपो, 2006.

• पाहाडी, अध्यापक अबदाशंकर, मनुसंहिता, संस्कृत बुक डिपो, कोलकाता, 2004.

• भट्टाचार्य, विमानचंद्र, संस्कृत साहित्येर रूपरेखा, बुक वर्ल्ड, 2004.

• बन्द्योपाध्याय, ड. मानवेन्दु, मनुसंहिता, संस्कृत पुस्तक भण्डार, कोलकाता,1410.

• बन्द्योपाध्याय, ड. श्रीमती शांति, वैदिक साहित्येर रूपरेखा, संस्कृत पुस्तक भण्डार, कोलकाता, 2003

• बन्द्योपाध्याय, सुरेशचन्द्र, मनुसंहिता, आनन्द पावलिसार्स, कोलकाता, 2000.

• भट्टाचार्य, जनेश्वरन्जन, धर्मशास्त्रेर संक्षिप्त इतिहास (धर्म, अर्थ, नीति), वि.एस. पब्लिकेशन, कोलकाता, 2016.

• ल' म्यान, वाला पुलिस हेन्डबुक, ल'स्थान पब्लिशिंग हाउस, कोलकाता, 2011.

• ल' म्यान, भारतीय साक्ष्य आइन, कोलकाता, 1999.

**सन्दर्भित-आङ्ग्लभाषानिबद्ध ग्रन्थाः:**


• Banerjee, Nikunja V., *Studies in Dharmasastra of Manu*, Munshiram Manoharlal, New Delhi, 1980.

• Bhandarkar, Sri Ramkrishna Gopal, *First Book of Sanskrit*, Low Price Publications, Delhi, 2004.

• Bhandarkar, Sri Ramkrishna Gopal, *Second Book of Sanskrit*, Low Price Publications, Delhi, 2000.

• Kane, Dr. Panduranga Vamana, *History of Dharmasastra : Ancient and Medieval Religious and Civil Law in India*, Government Oriental Series, Bhandarkar Oriental Research Institute, Pune, 1962.

• *Manusamhita : with Nine Commentaries*, Bharatiya Vidya Bhavan, Bombay, 1978.

• Mukhopadhyaya, Govindagopal, *A New Trilingual Dictionary*, Milan Publications, Gaziabad, 2002.

• Olivelle, *Dharmasutras : The Law codes of Ancient India*, Oxford University Press, 1999.

• Swain, Brajakishore, *Dharmasastra : A link between tradition and Modarnity*, Chowkhamba Sanskrit Bhavan, Varanasi, 2003.

• Swain, Brajakishore, *The Dharmasastra, An Intraductory Analysis*, Akshaya Prakashan, Delhi, 2011.